श्री स्वर्णाकर्षण भैरव स्तोत्रं

श्री स्वर्णाकर्षण भैरव स्तोत्रं

ॐ अस्य श्री स्वर्णाकर्षण भैरव स्तोत्र महामंत्रस्य ब्रह्म ऋषिः अनुष्टुप् छंदः श्री स्वर्णाकर्षण भैरवो देवता ह्रीं बीजं क्लीं शक्तिः सः कीलकं मम दारिद्र्य नाशार्थे पाठे विनियोगः ||

ऋष्यादि न्यासः |
ब्रह्मर्षये नमः शिरसि |
अनुष्टुप् छंदसे नमः मुखे |
स्वर्णाकर्षण भैरवाय नमः हृदि |
ह्रीं बीजाय नमः गुह्ये |
क्लीं शक्तये नमः पादयोः |
सः कीलकाय नमः नाभौ |
विनियोगाय नमः सर्वांगे |
ह्रां ह्रीं ह्रूं इति कर षडंगन्यासः ||

ध्यानं |
पारिजातद्रुम कांतारे स्थिते माणिक्यमंडपे |
सिंहासनगतं वंदे भैरवं स्वर्णदायकं ||

गांगेय पात्रं डमरूं त्रिशूलं
वरं करः संदधतं त्रिनेत्रं |
देव्यायुतं तप्त सुवर्णवर्ण
स्वर्णाकर्षणभैरवमाश्रयामि ||

मंत्रः |
ॐ ऐं ह्रीं श्रीं ऐं श्रीं आपदुद्धारणाय ह्रां ह्रीं ह्रूं अजामलवध्याय लोकेश्वराय स्वर्णाकर्षणभैरवाय मम दारिद्र्य विद्वेषणाय महाभैरवाय नमः श्रीं ह्रीं ऐं |

स्तोत्रं |
नमस्तेऽस्तु भैरवाय ब्रह्मविष्णुशिवात्मने |
नमस्त्रैलोक्यवंद्याय वरदाय परात्मने || 1 ||

रत्नसिंहासनस्थाय दिव्याभरणशोभिने |
दिव्यमाल्यविभूषाय नमस्ते दिव्यमूर्तये || 2 ||

नमस्तेऽनेकहस्ताय ह्यनेकशिरसे नमः |
नमस्तेऽनेकनेत्राय ह्यनेकविभवे नमः || 3 ||

नमस्तेऽनेककंठाय ह्यनेकांशाय ते नमः |
नमोस्त्वनेकैश्वर्याय ह्यनेकदिव्यतेजसे || 4 ||

अनेकायुधयुक्ताय ह्यनेकसुरसेविने |
अनेकगुणयुक्ताय महादेवाय ते नमः || 5 ||

नमो दारिद्र्यकालाय महासंपत्प्रदायिने |
श्रीभैरवीप्रयुक्ताय त्रिलोकेशाय ते नमः || 6 ||

दिगंबर नमस्तुभ्यं दिगीशाय नमो नमः |
नमोऽस्तु दैत्यकालाय पापकालाय ते नमः || 7 ||

सर्वज्ञाय नमस्तुभ्यं नमस्ते दिव्यचक्षुषे |
अजिताय नमस्तुभ्यं जितामित्राय ते नमः || 8 ||

नमस्ते रुद्रपुत्राय गणनाथाय ते नमः |
नमस्ते वीरवीराय महावीराय ते नमः || 9 ||

नमोऽस्त्वनंतवीर्याय महाघोराय ते नमः |
नमस्ते घोरघोराय विश्वघोराय ते नमः || 10 ||

नमः उग्राय शांताय भक्तेभ्यः शांतिदायिने |
गुरवे सर्वलोकानां नमः प्रणव रूपिणे || 11 ||

नमस्ते वाग्भवाख्याय दीर्घकामाय ते नमः |
नमस्ते कामराजाय योषित्कामाय ते नमः || 12 ||

दीर्घमायास्वरूपाय महामायापते नमः |
सृष्टिमायास्वरूपाय विसर्गाय सम्यायिने || 13 ||

रुद्रलोकेशपूज्याय ह्यापदुद्धारणाय च |
नमोऽजामलबद्धाय सुवर्णाकर्षणाय ते || 14 ||

नमो नमो भैरवाय महादारिद्र्यनाशिने |
उन्मूलनकर्मठाय ह्यलक्ष्म्या सर्वदा नमः || 15 ||

नमो लोकत्रयेशाय स्वानंदनिहिताय ते |
नमः श्रीबीजरूपाय सर्वकामप्रदायिने || 16 ||

नमो महाभैरवाय श्रीरूपाय नमो नमः |
धनाध्यक्ष नमस्तुभ्यं शरण्याय नमो नमः || 17 ||

नमः प्रसन्नरूपाय ह्यादिदेवाय ते नमः |
नमस्ते मंत्ररूपाय नमस्ते रत्नरूपिणे || 18 ||

नमस्ते स्वर्णरूपाय सुवर्णाय नमो नमः |
नमः सुवर्णवर्णाय महापुण्याय ते नमः || 19 ||

नमः शुद्धाय बुद्धाय नमः संसारतारिणे |
नमो देवाय गुह्याय प्रबलाय नमो नमः || 20 ||

नमस्ते बलरूपाय परेषां बलनाशिने |
नमस्ते स्वर्गसंस्थाय नमो भूर्लोकवासिने || 21 ||

नमः पाताळवासाय निराधाराय ते नमः |
नमो नमः स्वतंत्राय ह्यनंताय नमो नमः || 22 ||

द्विभुजाय नमस्तुभ्यं भुजत्रयसुशोभिने |
नमोऽणिमादिसिद्धाय स्वर्णहस्ताय ते नमः || 23 ||

पूर्णचंद्रप्रतीकाशवदनांभोजशोभिने |
नमस्ते स्वर्णरूपाय स्वर्णालंकारशोभिने || 24 ||

नमः स्वर्णाकर्षणाय स्वर्णाभाय च ते नमः |
नमस्ते स्वर्णकंठाय स्वर्णालंकारधारिणे || 25 ||

स्वर्णसिंहासनस्थाय स्वर्णपादाय ते नमः |
नमः स्वर्णाभपाराय स्वर्णकांचीसुशोभिने || 26 ||

नमस्ते स्वर्णजंघाय भक्तकामदुघात्मने |
नमस्ते स्वर्णभक्तानां कल्पवृक्षस्वरूपिणे || 27 ||

चिंतामणिस्वरूपाय नमो ब्रह्मादिसेविने |
कल्पद्रुमाधःसंस्थाय बहुस्वर्णप्रदायिने || 28 ||

नमो हेमादिकर्षाय भैरवाय नमो नमः |
स्तवेनानेन संतुष्टो भव लोकेशभैरव || 29 ||

पश्य मां करुणाविष्ट शरणागतवत्सल |
श्रीभैरव धनाध्यक्ष शरणं त्वां भजाम्यहं |
प्रसीद सकलान् कामान् प्रयच्छ मम सर्वदा || 30 ||

– फलश्रुतिः –
श्रीमहाभैरवस्येदं स्तोत्रसूक्तं सुदुर्लभं |
मंत्रात्मकं महापुण्यं सर्वैश्वर्यप्रदायकं || 31 ||

यः पठेन्नित्यमेकाग्रं पातकैः स विमुच्यते |
लभते चामलालक्ष्मीमष्टैश्वर्यमवाप्नुयात् || 32 ||

चिंतामणिमवाप्नोति धेनु कल्पतरुं धृवं |
स्वर्णराशिमवाप्नोति सिद्धिमेव स मानवः || 33 ||

संध्यायां यः पठेत् स्तोत्रं दशावृत्या नरोत्तमैः |
स्वप्ने श्रीभैरवस्तस्य साक्षाद्भूत्वा जगद्गुरुः || 34 ||

स्वर्णराशि ददात्येव तत्क्षणान्नास्ति संशयः |
सर्वदा यः पठेत् स्तोत्रं भैरवस्य महात्मनः || 35 ||

लोकत्रयं वशीकुर्यादचलां श्रियमवाप्नुयात् |
न भयं लभते क्वापि विघ्नभूतादिसंभव || 36 ||

म्रियंते शत्रवोऽवश्यमलक्ष्मीनाशमाप्नुयात् |
अक्षयं लभते सौख्यं सर्वदा मानवोत्तमः || 37 ||

अष्टपंचाशताणढ्यो मंत्रराजः प्रकीर्तितः |
दारिद्र्यदुःखशमनं स्वर्णाकर्षणकारकः || 38 ||

य येन संजपेत् धीमान् स्तोत्रं वा प्रपठेत् सदा |
महाभैरवसायुज्यं स्वांतकाले भवेद्ध्रुवं || 39 ||

इति रुद्रयामल तंत्रे स्वर्णाकर्षण भैरव स्तोत्रं ||